**PAPER - 4**

# MT

2018 .... .... 1100 **Seat No.** | | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - PRELIM - I PAPER - IV**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

**प्रथमः विभागः - गद्यम् ।**

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

राष्ट्रीयपुरस्कारप्राप्ताः चित्रपटाः ........... । अतः कुमारः ........... तं प्रेक्षितुम् इच्छति ।

(प्रेक्षणीयाः / निषिद्धाः) (शनिवासरे / रविवासरे)

(ii) कः कं वदति ? १

वयमपि तथैव करिष्यामः ।

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

कार्यसिद्धिं प्राप्तुं वैधाचारः अनुचितः ।

कुमारः - तात, अप्यद्य वयं सर्वे राष्ट्रीयपुरस्कारप्राप्तं चित्रपटं प्रेक्षितुं गच्छामः ?

जनकः - जात, किन्तु चित्रपटस्यास्य प्रवेशपत्राणि सद्यः नोपलभ्यन्ते इति श्रुतं मया । अद्य तु रविवासरः । तर्हि किमु व्यक्तव्यम् ?

कुमारः - जानामि तत्सर्वं, किन्तु अधिकमूल्यं दत्त्वा प्रवेशपत्राणि लभ्यन्ते ।

जनकः - सौम्य, कथं त्वया ज्ञायते ?

कुमारः - वयस्येन कथितम् । तेनापि तथा क्रीतानि । वयमपि तथैव करिष्यामः ।

जनकः - पुत्र, अपि जानासि त्वं यद् असावनुचितः मार्गः ? एष अवैधाचारः ।

कुमारः - श्रुतः मया शब्दोऽयम् । किन्तु तस्य समग्रार्थः न ज्ञातः ।

जनकः - श्रृणु तर्हि । केवलं स्वार्थसिद्धये अनुष्ठितं विधिविरुद्धमाचरणं, नियमातिक्रमणं, निषिद्धाचरणं नाम अवैधाचारः ।

कुमारः - स्वकार्यस्य सत्वरसिद्ध्यर्थं केचन जनाः तेषु तेषु कार्यालयेष्वधिकमूल्यं ददति इति श्रुतं मया । किमेष अवैधाचारः ?

जनकः - अथ किम् । महानेष अपराधः । यतः तेन विधिभङ्ग भवति अवैधाचारेण भ्रष्टजनानां कार्यसिद्धिः भवति किन्तु तेन जनसामान्याः स्वाधिकारवञ्चिताः भवन्ति । कार्यसिद्ध्यर्थं वैधाचारः उचितः । अतः कस्यापि वस्तुनः निश्चितमूल्यं दत्त्वैव क्रयणमुचितम् ।

**२. स्वमतप्रकटनम् ।** २

अपि वैधमार्गानुसरणम् अस्माकं कर्तव्यम् वा न इति माध्यमभाषया स्पष्टीकुरुत ।

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

'कबड्डी' प्राचीनकालतः महाराष्ट्रप्रदेशे प्रचलिता यतः .........

(तुकाराममहाराजस्य अभङ्गेषु तस्याः उल्लेखः दृश्यते । / सद्यःकालेऽपि कबड्डीक्रीडा महाराष्ट्रे लोकप्रिया अस्ति ।)

(ii) पूर्णवाक्येन उत्तरं लिखत । १

कबड्डीक्रीडायाः महत्त्वपूर्णं वैशिष्ट्यं किम् ?

(iii) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

कबड्डीक्रीडा वैयक्तिकी क्रीडा अस्ति ।

प्राचीनकालतो विविधाः क्रीडाः प्रचलिताः । काश्चित् साङ्घिकाः काश्चिच्च वैयक्तिकाः। साङ्घिकक्रीडासु कबड्डी इति भारतीया क्रीडा महाराष्ट्रराज्ये विशेषरूपेण लोकप्रियतां गता। 'हुतुतू' इति तस्या अपरनाम । तुकाराम-महाराजस्य अभङ्गवचनेषु एषा क्रीडा 'हमामा, हुंबरी, हुतुतू' इत्यादिभिः नामभिः निर्दिष्टा । बङ्गदेशे 'हुडू', दक्षिणभारते चेडुगुडु, उत्तरभारते 'कबड्डी' इति नाम्ना विख्यातैषा क्रीडा । अस्यां क्रीडायां प्रतिसङ्घं द्वादश क्रीडापटवः भवन्ति । क्रीडाङ्गणे तु सप्त क्रीडापटव एव खेलन्ति । पञ्च क्रीडापटवो बहिस्तिष्ठन्ति । एष क्रीडाप्रकारो न केवलं पुरुषाणाम्, अपि तु महिलानां कृते ऽपि प्रचलितोऽस्ति । अनया कबड्डी-क्रीडया शरीरचापल्यम्, उत्साहः, आक्रमकत्वं, स्वसंरक्षणवृत्तिः, शरीरसौष्ठवं च लभते । साहसं, निरीक्षणशक्तिः, योजकत्वं, निर्णयक्षमता, साङ्घिकी भावना, एकात्मता, देशाभिमानश्चैतैः नैकैर्गुणैः क्रीडकस्य व्यक्तित्वं विकसति । एतस्यै क्रीडायै कस्यापि क्रीडासाधनस्यावश्यकता नास्तीति महत्त्वपूर्णं वैशिष्ट्यमिति ।

**२. पृथक्करणम् ।** २




**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) गद्यांशात् पर्यायपदं चित्वा लिखत । १

a) सङ्कटम् - ............. । b) निकटम् - ............. ।

(ii) विशेषण-विशेष्य-अन्वितिः । (मेलनं कुरुत ।) १

| 'अ' | 'ब' |
|---|---|
| १) जन्तवः | गुप्तचराः । |
| २) कोटरे | क्षुद्राः । |
| | स्थिते । |

(iii) गद्यांशात् चित्वा द्वे तृतीयाविभक्त्यन्तपदे लिखत । १

दीर्घसमयोऽतीतः। अज्ञातवासकाले शस्त्रहीनः परिव्राजकवेषधारी अर्जुनः पुनरेकवारं तमेव वनप्रदेशं प्राविशत्। निबिडारण्ये पर्यटति तस्मिन् कुतश्चित् मनुजशब्द इव श्रुतिपथमागतः। कांश्चन गुप्तचरान् तं प्रति एवागच्छतः सः दृष्टवान्। सः व्यचिन्तयत्, ''अज्ञातवासकाले यदि कोऽपि मामभिजानीयात् तर्हि महापत्तिः उद्भवेत्। किं करणीयमधुना ।'' इति चिन्तयतः तस्य पुरतः सूर्यखगः तत्रोपस्थितः । तेन स्वरवेण मार्गं निर्दिश्यार्जुनः कस्यापि विशालवृक्षस्य समीपं नीतः । वृक्षे महान् कोटरः आसीत् । कोटरं प्रविश्य अर्जुनः तत्रैव निभृतः स्थितः । तस्मिन् कोटरे स्थिते पिपीलिकाभिस्तस्य सर्वाङ्गं तथा आच्छादितं यथा अदृश्यः इवाभवत्। अर्जुनमन्विष्यन्तः तत्रागताः ते गुप्तचराः तं ज्ञातुमसमर्थाः ततः प्रतिनिवृत्ताः। एवं सङ्कटमुक्तोऽर्जुनः सूर्यखगस्य पिपीलिकानां च वचनं स्मारं स्मारं तान् प्रति कृतज्ञतां प्रकटितवान् ।

२. **पृथक्करणम् ।**

यथाक्रमं घटनाः लिखत । २

(i) पिपीलिकानां सहाय्यम् ।

(ii) सूर्यखगस्य दिशादर्शनम् ।

(iii) गुप्तचराणाम् आगमनम् ।

(iv) अर्जुनस्य कृतज्ञताप्रकटनम् ।

**द्वितीयः विभागः - पद्यम् ।**

प्र.२ अ) **पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **पृथक्करणम् ।** २




ज्ञानतेजसो महान् निधिस्त्वं दयाघनस्त्वं तपोनिधिस्त्वम् ।
अनिशं शिष्यहितस्य चिन्तनं गुरुचरणाभ्यां सदा वन्दनम् ।।१।।
कुम्भकारस्त्वं मृत्तिका अहं मूर्तिकारस्त्वं पाषाणोऽहम् ।
तव हस्ताभ्यां मम निर्माणं कदापि मा भूत् ते विस्मरणम् ।।२।।
माऽस्तु धनं मौक्तिकं काञ्चनम् अस्तु अविरतं तव प्रसादनम् ।
त्वत्स्पर्शान्मे भवतु सुवर्णं गुरुचरणाभ्यां सदा वन्दनम् ।।३।।

२. **शब्दज्ञानम् ।** १

पर्यायपदं मेलयत ।

| | अ | ब |
|---|---|---|
| (i) | निधिः | मुक्ताफलम् |
| (ii) | मौक्तिकम् | काञ्चनम् |
| | | सञ्चयः |

**प्र.२ ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन च ।
दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन्॥१॥
अतिथिर्बालकः पत्नी जननी जनकस्तथा ।
पञ्चैते गृहिणा पोष्या इतरे च स्वशक्तितः ॥२॥
गुणी गुणं वेत्ति न वेत्ति निर्गुणः
बली बलं वेत्ति न वेत्ति निर्बलः ।
पिको वसन्तस्य गुणं, न वायसः
गजश्च सिंहस्य बलं न मूषकः ॥३॥

**१. अवबोधन ।**

पूर्णवाक्येन उत्तरत । १

दन्ताः केन घर्षयेयुः ?

**२. तात्पर्यलेखनम् ।** २

तृतीयश्लोकस्य तात्पर्यं माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् ।**

**सुभाषितं शुद्धं पूर्णं च लिखत । (केवलं १ श्लोकः लेखनीयः ।)** २

(i) पात्रापात्र० ....... विषम् ॥

(ii) भोजनान्ते ....... न जायते ॥

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | | |
|---|---|---|
| (i) | शस्त्रैर्हतास्तु रिपवो | यत्रालस्यविहीनता । |
| (ii) | शनैः शनैश्च भोक्तव्यं | यामयुग्मं न लङ्घयेत् । |
| (iii) | यत्रोत्साहसमारम्भो | सुहता भवन्ति । |
| (iv) | याममध्ये न भोक्तव्यम् | स्वयं वित्तमुपार्जितम् । |
| | | न हता भवन्ति । |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | तृतीया एकवचन | द्वितीया बहुवचन | सम्बोधन एकवचन |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(यात्रिन्, एताः, शावकान्, अनेन, सर्व, वाचा)

**आ) क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | वर्तमानकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|
| | | | | | |

(प्राप्नोत्, पूजयामास, स्युः, वक्ष्यसि, जानानि, ब्रवीति)

**इ) समासाः । कोष्ठकपूर्तिं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| | **समस्तपद** | **विग्रहः** | **समासनाम** |
|---|---|---|---|
| (i) | रोमनगरम् | .................. | कर्मधारय समास |
| (ii) | शस्त्रहीनः | शस्त्रैः हीनः । | .................. |
| (iii) | पर्वतस्थः | .................. | उपपद तत्पुरुष समास |
| (iv) | पात्रापात्रे | पात्रं च अपात्रं च । | .................. |
| (v) | निर्बलः | .................. | प्रादि बहुव्रीहि समास |
| (vi) | सप्तपदी | सप्तानां पदानां समाहारः । | .................. |

**ई) उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) अर्जुनस्य ............... उपरि काञ्चन पिपीलिकाः वृक्षादपतन् । ( हस्तम् / हस्तस्य / हस्तात् )

(ii) ................ अभितः ग्रहाः भ्रमन्ति ( सूर्यस्य / सूर्याय / सूर्यम् )

(iii) अध्यापकः ............. कथां कथयति । ( छात्राः / छात्राय / छात्रे )

(iv) सर्वे जनाः ................ अतीव स्निह्यन्ति । ( मातृभूमिं / मातृभूमि / मातृभूमौ )

(v) ................ विना कथं चिकित्सकः भवेत् । (सेवाभावाय / सेवाभावेन / सेवाभावः )

(vi) ................ ऋते नदी न कुत्र गच्छति । ( सागरस्य / सागरात् / सागरम् )

**उ) सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) .......... = तत् + आकर्ण्य ।

(ii) एतन्न = .......... + न ।

(iii) तदैव = तदा + .......... ।

(iv) बहिस्तिष्ठन्ति = .......... + तिष्ठन्ति ।

(v) .......... = रसोत्पत्तिः + याम ।

(vi) तच्छरेण = तत् + ..........।

**ऊ) सङ्ख्यावाचकविशेषणानि - रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) मराठीभाषायां ................ वचने । (2)

(ii) संवत्सरे .............. अयने स्तः । (2)

(iii) ................. पद्यपाठः अद्यैव पठितः अस्माभिः । (5th)

(iv) चैत्रमासे ................. तिथौ श्रीरामः अजायत । (9th)

(v) अयं मे वयस्यः .................. विदेशं गतः । (thrice)

(vi) देवनाम ............... उच्चार्य सर्वे उपविष्टाः । (10 times)

**चतुर्थः विभागः - लेखनकौशल्यम् ।**

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| अहं | दानेन | तरन्ति |
| सागरे | आनन्देन | अस्मि |
| हस्तः | मत्स्याः | नृत्यन्ति |
| बालकाः | शिक्षिका | शोभते |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

सन्तशिरोमणिना रामदासस्वामिना एकं वैश्विकसत्यं कथितम्। अस्मिन् ....... न कोऽपि सर्वसुखी विद्यते । पूर्वसञ्चितानुसारम् अस्मिन् जन्मनि सुखदुःखानि भोक्तव्यानि। सर्वे जनाः सुखं कामयन्ते । किन्तु दुःखस्यानन्तरं सुखम् आगच्छति । तदा ....... विषण्णीभूत्वा किमर्थं दुःखं द्विगुणीकर्तव्यम् ? वास्तवं जीवनं ....... कल्पनाविश्वे मनुजः रममाणः भवति। यदि तस्य मनः प्रशिक्षितं भवेत् तर्हि स जीवने ....... निर्मातुं शक्नोति ।

(त्यक्त्वा, दुःखेन, जगति, आनन्दं)

**Best of Luck**